# संस्कृतरचनापाठ्यक्रमः
# २०८२

## कक्षा : नवमी दशमी च

नेपाल सरकार
शिक्षा, विज्ञान तथा प्रविधि मन्त्रालय
पाठ्यक्रम विकास केन्द्र
सानोठिमी, भक्तपुर

# संस्कृतरचनापाठ्यक्रमः
# २०८२

कक्षा : नवमी दशमी च | विषयसङ्केत : १०७१

पाठ्यघण्टा : ५ | वार्षिककार्यघण्टा : १६०

## १. परिचयः

संस्कृतरचनाविषयकोऽयमाङ्ग्लभाषाया विकल्पेऽध्याप्यमानः पाठ्यक्रमः संस्कृतभाषायाः संरचनादिज्ञानाय, संस्कृतभाषायां निबद्धानां ज्ञानराशीनां ग्रहणाय च विकसितो वर्तते । संस्कृतवाङ्मयस्य विपुलतमज्ञानराशेः, पौरस्त्यदर्शननिहितानां जीवनजगत्सम्बन्धिनामत्युपयोगिनां यथार्थपरकाणां विषयाणां चानुशीलनाय संस्कृतभाषाया अध्ययनमावश्यकं भवति यतस्तेषां स्रोतोभूतानि वेद-वेदाङ्गोपनिषत्-पुराणेतिहास-धर्मशास्त्र-दर्शन-काव्यानि तेषां प्रामाणिकव्याख्यानानि च संस्कृतभाषायामेवोपनिबद्धानि वर्तन्ते । एवमन्तरिक्षविज्ञानायुर्विज्ञान-नीतिग्रन्थादि-बहुविधदर्शनानाञ्चाध्ययनं संस्कृतभाषाया अध्ययनेन विना न सम्भवति । तथ्यमेतद् विचार्य आविश्वं बह्वीषु शिक्षणसंस्थासु संस्कृतभाषायाः पठनपाठनयोः परम्परा प्रारब्धा दृश्यते । सन्दर्भेऽस्मिन् संस्कृतवाङ्मयस्य जीवनोपयोगिनां सैद्धान्तिकानां व्यावहारिकाणां च पक्षाणामध्ययनाध्यापनयोरावश्यकतां निभाल्य संस्कृतरचनाविषयस्य पाठ्यक्रमोऽयं विकसितो वर्तते । एवमेव लौकिकव्यवहारे संस्कृतभाषया व्यवहारस्याविच्छिन्नपरम्पराया नैरन्तर्याय च माध्यमिकस्तरे संस्कृतभाषायाः पठनपाठनमपरिहार्यं दृश्यते । माध्यमिकस्तरस्य ९-१० कक्षयोः पाठ्यक्रमोऽयमाधारभूतस्तरस्य ६-८ कक्षाणां संस्कृतरचनापाठ्यक्रमस्य विकसितरूपः, माध्यमिकस्तरस्य ११-१२ कक्षयोश्चाधाररूपः सिद्ध्येतेति धिया निर्मितोऽस्ति । २०७६ तमे वैक्रमाब्दे प्रकल्पितं राष्ट्रियपाठ्यक्रमप्रारूपमवलम्ब्य पाठ्यक्रमोऽयं निर्मितोऽस्ति । जिज्ञासुषु भाषिकशिल्पानां विकासाय प्रकल्पितेऽस्मिन् पाठ्यक्रमे साहित्य-दर्शनेतिहास-कलादिसम्बद्धविषयाः समाविष्टाः सन्ति । संस्कृते विद्यार्थिनामभिरुचिवर्धनाय, शिक्षाया राष्ट्रियोद्देश्यस्य पूर्तये चायं पाठ्यक्रमः समर्थः स्यादित्यभिलषितं वर्तते । सैद्धान्तिकविषयाणां व्यावहारिकरूपेण प्रयोगो भवेदिति चापेक्षा वर्तते ।

पाठ्यक्रमेणनेन मूलतः पद्य-गद्य-पत्र-संवाद-व्यावहारिकलेखन-स्वतन्त्रलेखन-सर्जनात्मकलेखनविषयक्षेत्रसम्बद्धा भाषिकशिल्पाधृताः स्तरगतयोग्यता अपेक्षिता वर्तन्ते । अत्र विद्यार्थिनां रुचि-स्तरावश्यकतानुकूल्येन पाठ्यवस्तूनां समायोजनं विहितं विद्यते । भाषिकशिल्पानामार्जनेन सहैव प्रकृति-पर्यावरण-सांस्कृतिकसम्पदां संरक्षणादिकार्येषु प्रवर्तनाय च विद्यार्थिषु पाठ्यक्रमोऽयं जागरणमानेष्यतीत्यपेक्ष्यते । समस्तप्राणिहितार्थम्, विश्वबन्धुत्वभावनाया विकासार्थम्, दानसेवादीनां महत्त्वप्रकाशनार्थम्, समग्रतया मानवीयगुणानां प्रसारणार्थं विविधेषु विद्यालयेषु विश्वविद्यालयेषु च संस्कृतभाषाया अध्ययनाध्यापनादिकार्याणि सञ्चाल्यमानानि सन्ति । नेपालेऽपि विद्यार्थिनः संस्कृतस्य लाभं प्राप्नुयुस्तथा राष्ट्रनिर्माणे योगदानं कर्तुं क्षमा भवेयुरिति धिया प्रकृतपाठ्यक्रमः प्रस्तुतो विद्यते । भाषाया अध्ययनेन श्रवणभाषणपठनलेखनरूपाणि भाषिकशिल्पानि अधिगन्तव्यानि । उपर्युक्तानि शिल्पान्यधिगत्य विद्यार्थिनो भाषिककौशलं प्राप्नुयुरिति लक्ष्यं पुरस्करोत्ययं पाठ्यक्रमः । व्यावहारिकज्ञानादृते केवलेन सैद्धान्तिकज्ञानेन भाषाप्रयोगे सारल्यं नायातीति मत्वा श्रुतिबोधः, पठनबोधः,

लेखनसामर्थ्यम्, सम्भाषणकौशलञ्चात्र सन्निहिता विषयाः । वर्तमानशिक्षाप्रणाल्यामाधुनिकशिक्षणपद्धतिरनुसृता वर्तते । तद्विचार्य प्रयोगाभ्यासप्रधानो गद्यपद्यरूपकसंयुतो व्यावहारिकलेखनचातुर्ययुतश्चायं पाठ्यक्रमो विकसितः, तदनुकूलानां पाठ्यविषयाणाञ्च समावेशोऽत्र विहितो वर्तते ।

परिचयम्, स्तरगतयोग्यताम्, कक्षागतशिक्षणोपलब्धिं तद्विस्तारञ्च, विषयवस्तुनः क्षेत्रक्रमौ, विषयक्षेत्रानुसारेण सम्भाव्यान् शिक्षणसहजीकरणकार्यकलापान्, सम्भाव्यप्रयोगात्मक-परियोजनाकार्याणां मार्गदर्शनम्, विद्यार्थिमूल्याङ्कनस्य विधिप्रक्रिये तत्साधनानि च समाविश्य विकसितेऽस्मिन् पाठ्यक्रमे विषयगतौचित्यं निर्दिश्य पाठ्यक्रमस्य विशेषता निरूपिताः सन्ति, पाठ्यक्रमस्य स्वरूपं संयोजितमस्ति, विषयापेक्षितज्ञानशिल्पाभिवृत्तिमूल्यानि च निर्दिष्टानि सन्ति । शिक्षणस्य स्तरम्, विशिष्टीकृतविस्तृतीकरणेन शिक्षणोपलब्धिम्, स्तरगतयोग्यताम्, लम्बीयसन्तुलनस्याधारेण विषयवस्तुनः क्षेत्रक्रमौ, मौलिकतां च संयोज्य शिक्षणसहजीकरणस्य विधिप्रक्रिये, निर्माणात्मकनिर्णयात्मकमूल्याङ्कनयोर्विधिञ्चोल्लिख्य अत्र विद्यार्थिमूल्याङ्कनस्य व्यवस्था विहितास्ति । अस्य विषयस्य शिक्षणाय प्रतिसप्ताहम् ५ पाठ्यघण्टाः (प्रतिवर्षम् १६० कार्यघण्टाः) निर्धारिता विद्यते । विषयेऽस्मिन् विद्यार्थिमूल्याङ्कनस्य कृते प्रतिशतम् २५ अङ्कभार आन्तरमूल्याङ्कनाय, प्रतिशतम् ७५ अङ्कभारश्च बाह्यमूल्याङ्कनाय निर्धारितोऽस्ति ।

## २. स्तरगतयोग्यताः

माध्यमिकस्तरे ९-१० कक्षयोः संस्कृतरचनाविषयमधीत्य विद्यार्थिनो निर्दिष्टविषयेषु क्षमा भविष्यन्ति

१. निर्दिष्टक्षेत्राणां विषयवस्तुबोधे तदभिव्यक्तौ च

२. निर्दिष्टक्षेत्राणां लिखितविषयाणां पठनकौशलप्रदर्शने

३. प्रकाशितविषयाणामनुशीलनं विधाय मौखिकेन लिखितेन वा रूपेण तद्विषयाणामभिव्यक्तौ

४. निर्दिष्टक्षेत्राणां लिखितविषयाणां पठनेन तेषां व्यावहारिकानुशीलने

५. दृष्टश्रुतपठितानुभूतविषयाणां मौखिकलिखितरूपेणाभिव्यक्तिशिल्पप्रदर्शने

६. सामाजिकसांस्कृतिकव्यावहारिकविषयेषु लेखनकौशलप्रदर्शने

७. सांस्कृतिकप्राकृतिकक्षेत्रसम्बद्धानां विषयाणां मौखिकलिखिताभिव्यक्तौ

८. शोधपरियोजनाकार्येषु प्रवर्तने, प्रतिवेदनलेखने तत्प्रस्तुतौ च

९. तार्किकविमर्शनात्मकसमस्यासमाधानप्रधानाभिव्यक्तिकौशलप्रदर्शने

१०. पाठगतसन्दर्भमाधृत्य घटनावर्णनस्य, चरितचित्रणस्य, परिवेशनिर्धारणस्य च कौशलप्रदर्शने ।

## ३. कक्षागतशिक्षणोपलब्धयः

### कक्षा ९

### श्रवणभाषणशिल्पम्

#### श्रवणं भाषणञ्च

| शिक्षणोपलब्धयः | शिक्षणोपलब्धीनां विस्तरः |
|---|---|
| १. पदवाक्ययोः श्रवणेन तेषां शुद्धोच्चारणम् | १.१ पदानि श्रुत्वा यथाविधि तदुच्चारणम्<br>१.२ गद्यांशं श्रुत्वा तदनुरूपं वाचनम्<br>१.३ पठितस्य गद्यांशस्य नियमानुकूलं भाषणम्<br>१.४ गद्यांशगतपदवाक्यानां सार्थबोधमुच्चारणम् |
| २. सलयं सार्थबोधं च पद्यानां वाचनम् | २.१ श्रुतस्य पद्यस्य लयानुशीलनम्<br>२.२ पाठस्थपद्यस्य यथालयं गायनम्<br>२.३ पद्यस्थपदानां लयानुकूलं वाचनम्<br>२.४ श्रुतविषयाणामाशयानुरूपं प्रतिक्रियादानम्<br>२.५ पद्यं श्रुत्वा तद्गतभावप्रकटनम् |
| ३. पठितपदानामर्थापनेन वाक्येषु प्रयोगः | ३.१ पठितपदानां सन्दर्भानुकूलमर्थप्रकटनम्<br>३.२ अर्थं श्रुत्वा पाठस्थशब्दानामभिज्ञानम्<br>३.३ पदार्थाननुशील्य वाक्यार्थप्रकाशनम्<br>३.४ पठितपदानां सार्थवाक्येषु योजनम् |
| ४. पठितविषयाधारेण प्रश्नोत्तरणम् | ४.१ पठितविषयमाधृत्य प्रश्ननिर्माणम्<br>४.२ पठितविषयेषु जिज्ञासाभिव्यञ्जनम्<br>४.३ पठितविषयाधृतप्रश्नानामुत्तरणम् |
| ५. श्रुतस्य पठितस्य वा विषयवस्तुनः सार-भाव-संरचना-क्रमाणां कथनं पाठस्थचरितानां परिचायनञ्च | ५.१ पठितस्य श्रुतस्य वा विषयवस्तुनः सारभावकथनम्<br>५.२ निर्दिष्टविषयवस्तुनो विधागतसंरचनाया अभिव्यञ्जनम्<br>५.३ निर्दिष्टविषयवस्तूनां श्रवणेन यथाक्रमं प्रस्तुतिः<br>५.४ पाठस्थचरितानां सपरिचयं वैशिष्ट्यप्रकाशनम् |

| शिक्षणोपलब्धयः | शिक्षणोपलब्धीनां विस्तरः |
| --- | --- |
| ६. परिचितविषयेषु स्वाभिमतप्रकटनम् | ६.१ श्रुतस्य दृष्टस्य पठितस्य वा विषयवस्तुनः स्वशब्दैः कथनम्<br>६.२ अनुभूतविषयस्य वर्णनम्<br>६.३ अनुभूतसमस्यायाः समाधानोपायकथनम् |
| ७. पाठे प्रयुक्तानां भाषातत्त्वानां स्वरूपकथनम् | ७.१ पाठानुप्रयुक्तसन्धीनां स्वरूपनिर्धारणम्<br>७.२ निर्दिष्टानां शब्दानां धातूनाञ्च रूपावलिकथनम्<br>७.३ पाठप्रयुक्तानामव्ययपदानां निदर्शनम्<br>७.४ निर्दिष्टप्रत्ययैर्निष्पन्नानां पाठप्रयुक्तानां पदानामभिव्यञ्जनम्<br>७.५ पाठस्थवाक्येषु प्रयुक्तानां पदानां कारकविभक्तिनिर्देशनम्<br>७.६ वाक्यं श्रुत्वा तस्य लिङ्ग-वचन-पुरुषनिर्धारणम्<br>७.७ लिङ्ग-वचन-पुरुषाधारेण वाक्यपरिवर्तनम् |
| ८. पाठगतविषयाणां वर्णनम् | ८.१ पाठं पठित्वा तद्गतविषयाणां वर्णनम्<br>८.२ काव्यपद्यश्रवणेन तद्गतसूक्तीनामाशयकथनम्<br>८.३ नीतिपद्यं श्रुत्वा तद्गतनीतिविषयप्रकटनम्<br>८.४ नीतिकथां श्रुत्वा तद्गतनीतेरावश्यकत्वनिगदनम्<br>८.५ पौराणिककथाया आकर्णनेन ततो ग्राह्यपक्षनिरूपणम्<br>८.६ कथायाः श्रवणेन मित्रताया महत्त्वकथनम्<br>८.७ संवादं श्रुत्वा बालस्वास्थ्ये भोजनस्य स्थाननिर्धारणम्<br>८.८ सूचनादिलेखननियमान् श्रुत्वा तत्रावश्यकविषयाणां क्रमनिर्धारणम्<br>८.९ सामाजिकप्रबन्धं श्रुत्वा समाजे परस्परसहयोगस्य महत्त्वाख्यापनम्<br>८.१० प्रकृतिवर्णनपराणि पद्यानि श्रुत्वा प्रकृतिसंरक्षणस्य महत्त्वनिगदनम् |

## पठनम्

| शिक्षणोपलब्धयः | शिक्षणोपलब्धीनां विस्तरः |
|---|---|
| १. निर्दिष्टक्षेत्राणां पाठ्यवस्तूनां सस्वरपठनम् | १.१ लयमनुसृत्य पद्यस्य पठनम्<br>१.२ यति-गतिसंयोजनेन गद्यस्य पठनम्<br>१.३ साभिनयं संवादस्य पठनम्<br>१.४ विरामादिचिह्नानां पालनेन गद्यांशस्य सस्वरं वाचनम्<br>१.५ सन्धिस्थलानि निश्चित्य निर्धारितगद्यांशस्य पठनम् |
| २. पठनगत्या विकासपूर्वकं पठनम् | २.१ गद्यांशगतपदानां वाक्यानामनुच्छेदानाञ्च द्रुतपठनम्<br>२.२ पद्यांशस्य यति-गति-लयसंयोजनेन द्रुतवाचनम्<br>२.३ संवादस्य कथनानामाशयबोधपूर्वकं द्रुतपठनम्<br>२.४ पत्रस्य विषयज्ञानपूर्वकं द्रुतपठनम् |
| ३. पाठगतभाषातत्त्वानामनुशीलनम् | ३.१ गद्यपद्ययोः सन्धिविच्छेदपुरःसरं पठनम्<br>३.२ मात्रामनुसृत्य यथाकालं पदगतवर्णानां पठनम्<br>३.३ निर्दिष्टानां धातूनां शब्दानाञ्च रूपावल्यास्तत्प्रयोगेण निर्मितवाक्यानाञ्च पठनम्<br>३.४ पाठं पठित्वा निर्दिष्टप्रत्ययैर्निष्पन्नानां पदानां सूचीकरणम्<br>३.५ पाठाद् निर्दिष्टकारकविभक्त्योरुदाहरणानामन्वेषणम्<br>३.६ पाठस्य मौनपठनेन निर्दिष्टकालद्योतकानां क्रियापदानां सूचीनिर्माणम्<br>३.७ अव्ययपदानां पाठानुकूलमर्थनिर्धारणम्<br>३.८ वाक्यं पठित्वा तस्य लिङ्ग-वचन-पुरुषनिश्चयनम् |
| ४. निर्दिष्टविषयाणां मौनपठनेन बोधप्रश्नानामुत्तरदानम् | ४.१ पठस्य मौनपठनेन विषयसम्बद्धप्रश्ननिर्माणम्<br>४.२ गद्यांशस्य पद्यांशस्य च मौनपठनेन तदनुवर्तिनां बोधप्रश्नानामुत्तरदानम्<br>४.३ पाठ्यवस्तूनां मौनपठनेन अज्ञातार्थशब्दवाक्यानामर्थान्वेषणम् |

| शिक्षणोपलब्धयः | शिक्षणोपलब्धीनां विस्तरः |
|---|---|
| ५. पाठशीर्षक-संरचना-परिवेशोद्देश्याभिप्रायबोधपूर्वकं पठनम् | ५.१ निर्धारितगद्य-पद्य-पत्र-संवादान् पाठातिरिक्तसामग्रीश्च पठित्वा तद्गतविषयप्रकाशनम्<br>५.२ पाठ्यांशमधीत्य प्रमुखविषयाणां सूत्रीकरणम्<br>५.३ पाठं पठित्वा विषयवस्तुनः सङ्क्षेपेण प्रकटनम्<br>५.४ निर्दिष्टविषयवस्तुनोऽध्ययनेन तत्सम्बद्धप्रश्नानामुत्तरणम्<br>५.५ पाठमधीत्य सारगर्भितवाक्यानां भावविस्तारः<br>५.६ पाठ्यवस्तूनि अन्याः सामग्रीश्च पठित्वा तत्सारसन्देशकथनम्<br>५.७ श्रुतस्य दृष्टस्य पठितस्य वा वस्तुनो विषयेऽभिव्यञ्जनम्<br>५.८ अनुभूतिमाधृत्य सामयिकविषयेऽभिमतप्रकटनम् |
| ६. पाठगतविषयाणामध्ययनेन तद्गतविषयनिरूपणम् | ६.१ प्रकृतिसम्बद्धपद्यानि पठित्वा प्रकृतिसंरक्षणस्य कारणानामुदीरणम्<br>६.२ नीतिपद्यं पठित्वा तद्गतनीतिविषयस्य व्यवहारोपयोगित्वसाधनम्<br>६.३ नीतिकथाया अध्ययनेन तद्गतनीतेरादर्शमयत्वसाधनम्<br>६.४ नीतिप्रबन्धं पठित्वा जीवने नीतिशिक्षाया आवश्यकत्वनिरूपणम्<br>६.५ स्वास्थ्यप्रबन्धं पठित्वा प्राचीनशल्यतन्त्रस्य वर्तमानचिकित्सायां प्रभावनिगदनम्<br>६.६ संवादं पठित्वा बालभोजनसामग्रीणां हितकरप्रयोगविधिनिरूपणम् |

## लेखनम्

| शिक्षणोपलब्धयः | शिक्षणोपलब्धीनां विस्तरः |
|---|---|
| १. पदानां वाक्यानाञ्च शुद्धतया लेखनम् | १.१ पदानां वाक्यानाञ्च श्रुतलेखनम्<br>१.२ पदानां वाक्यानाञ्च यथावल्लेखनम्<br>१.३ अशुद्धिनिराकरणेन पदानां वाक्यानाञ्च लेखनम्<br>१.४ पठितपदानां शुद्धलेखनम् |

| शिक्षणोपलब्धयः | शिक्षणोपलब्धीनां विस्तरः |
|---|---|
| २. पठितपदानामर्थानुकूलवाक्येषु योजनम् | २.१ पठितपदानां पाठानुकूल्येनार्थापनम्<br>२.२ पठितपदानां पर्यायान्वेषणं प्रयोगश्च<br>२.३ अनेकार्थकपदानां प्रयोगप्रदर्शनम्<br>२.४ ज्ञातार्थपदानां पाठस्थविलोमपदानामन्वेषणम्<br>२.५ पठितपदानां योजनेन वाक्यनिर्माणम् |
| ३. अनुच्छेदं पठित्वा प्रश्ननिर्माणम्, तदाधृतप्रश्नानामुत्तरदानञ्च | ३.१ सरलसुबोधवाक्यैर्निर्मितादनुच्छेदाद् बोधप्रश्नानां निर्माणम्<br>३.२ निर्दिष्टानुच्छेदान्निर्मितानां प्रश्नानामुत्तरणम्<br>३.३ निर्दिष्टानुच्छेदस्य सङ्क्षेपीकरणं सारलेखनञ्च<br>३.४ निर्दिष्टानुच्छेदस्य प्रमुखविषयाणां सूत्राङ्कनम् |
| ४. पठितविषयमाधृत्य प्रश्ननिर्माणमुत्तरप्रदानञ्च | ४.१ पठितविषयवस्तुनः प्रश्नोपस्थापनम्<br>४.२ पठितवाक्यस्थपदानां प्रश्नार्थकपदैः प्रतिष्ठापनम्<br>४.३ प्रश्नप्रकृतिमभिज्ञाय तदनुसारेणोत्तरप्रदानम्<br>४.४ पाठसम्बद्धप्रश्नानामुत्तरलेखनम् |
| ५. निर्धारितगद्यपद्यांशयोर्विषयप्रकाशनम् | ५.१ पठितगद्यानां सार-सन्देशलेखनम्<br>५.२ पठितानां पद्यानां गीतानाञ्च भावार्थप्रकाशनम्<br>५.३ पाठगतानां सुभाषितानां भावविशदीकरणम्<br>५.४ पाठगतचरितानां चारित्रिकवैशिष्ट्यविश्लेषणम्<br>५.५ पठितविषयाणां सतर्कं वर्णनम्<br>५.६ पाठगतानां विशिष्टवाक्यानां सप्रसङ्गं व्याख्यानम् |
| ६. निर्दिष्टविषयेषु सर्जनात्मकलेखनम् | ६.१ परिचितविषयाणां लिखितवर्णनम्<br>६.२ सूत्राण्याधृत्य कथालेखनम्<br>६.३ पद्यस्य संवादस्य च स्वशब्दैर्गद्ये रूपान्तरणम्<br>६.४ स्वकीयवैयक्तिकविवरणस्य निर्माणम्<br>६.५ अनुभूतविषयमवलम्ब्यानुच्छेदरचना |

| शिक्षणोपलब्धयः | शिक्षणोपलब्धीनां विस्तरः |
|---|---|
| ७. पठितविषयमनुशील्य मौलिकलेखनम् | ७.१ संस्कृतेर्माहात्म्यप्रकटनेनानुच्छेदरचना<br>७.२ पौराणिकपद्यानां भावार्थप्रकाशनेन प्रकृतेर्महत्त्वप्रतिपादनम्<br>७.३ सोदाहरणं पद्यवर्णितनीतीनां व्यवहारोपयोगेन जायमानस्य लाभस्य निरूपणम्<br>७.४ नीतिकथायां वर्णितस्य पक्षस्य व्यावहारिकत्वनिरूपणम्<br>७.५ कथायाः पात्राणां चरित्रगतवैशिष्ट्यनिरूपणम्<br>७.६ सामाजिकसद्भावस्य महत्त्वाख्यापनेन मौलिकलघुप्रबन्धरचनम्<br>७.७ चित्तस्थैर्यस्य प्रयोजनं संसूच्य अनुच्छेदरचना<br>७.८ विविधविधानां प्रशासनिकपत्राणां निदर्शनलेखनम्<br>७.९ बालस्वास्थ्यसंरक्षणस्य विधिनिरूपणम्<br>७.१० प्रदत्तविषयेषु सूचना-शुभकामनापत्र-वर्धापनपत्राणां लेखनम् |
| ८. सरलवाक्यानामनुवादः | ८.१ पठितसंस्कृतवाक्यानां नेपालिभाषायामनुवादः<br>८.२ नेपालिभाषायाः सरलवाक्यानां संस्कृतेऽनुवादः<br>८.३ प्रदत्तस्य पठितानुच्छेदस्य नेपालिभाषायामनुवादः |
| ९. पाठे प्रयुक्तानां भाषातत्त्वानां प्रयोगः | ९.१ पाठगतपदवाक्यानां सन्धिविधानं सन्धिविच्छेदनञ्च<br>९.२ निर्दिष्टानां शब्दानां धातूनाञ्च रूपावल्याः प्रयोगः<br>९.३ पाठप्रयुक्तानामव्ययपदानां वाक्येषु योजनम्<br>९.४ निर्दिष्टप्रत्ययैर्निष्पन्नानां पाठप्रयुक्तानां पदानां प्रकृतिप्रत्ययविच्छेदनं वाक्येषु प्रयोगश्च<br>९.५ पाठे प्रयुक्तानां कारकविभक्तीनां यथानिर्देशं प्रयोगः<br>९.६. प्रदत्तवाक्यानां लिङ्ग-वचन-पुरुषपरिवर्तनेन लेखनम् |

## कक्षा १०

### श्रवणं भाषणञ्च

| शिक्षणोपलब्धयः | शिक्षणोपलब्धीनां विस्तरः |
|---|---|
| १. वर्ण-पद-वाक्यानुच्छेदानामनूच्चारणम् | १.१ श्रुतानां वर्णानां शुद्धोच्चारणम्<br>१.२ संश्रुतपदानामनूच्चारणम्<br>१.३ अधीतानधीतानां वाक्यानामनुच्छेदानाञ्चानुवाचनम् |
| २. गद्यांशानां यथाश्रुति वाचनम् | २.१ गद्यांशस्य सस्वरं वाचनम्<br>२.२ पठितस्य गद्यांशस्य यथाविधि भाषणम्<br>२.३ गद्यांशगतपदानां भावप्रकटनेन उच्चारणम् |
| ३. पद्यस्य श्रवणेन यथालयमुच्चारणम् | ३.१ पद्यं श्रुत्वा लयानुशीलनम्<br>३.२ निर्दिष्टपद्यस्य यथालयमुच्चारणम्<br>३.३ गतियत्यादिवशात् पद्यप्रयुक्तच्छन्दोऽभिज्ञानम्<br>३.४ लयं निश्चित्य पद्यगतपदानां वाचनम्<br>३.५ श्रुतस्य पद्यस्य भावाभिव्यञ्जनम् |
| ४. पठितपदानां सार्थं वाक्येषु प्रयोगः | ४.१ पदानां पाठानुकूलमर्थप्रकटनम्<br>४.२ अर्थं श्रुत्वा पाठस्थशब्दानां कथनम्<br>४.३ पदार्थानुशीलनेन वाक्यार्थप्रकाशनम्<br>४.४ पठितपदानामर्थबोधेन वाक्येषु योजनम् |
| ५. पठितविषयमाधृत्य प्रश्नोत्तरणम् | ५.१ पठितविषयमाधृत्य प्रश्ननिर्माणम्<br>५.२ पठितविषयेषु जिज्ञासोद्भावनम्<br>५.३ अधीतविषयाधृतप्रश्नानामुत्तरणम् |

| शिक्षणोपलब्धयः | शिक्षणोपलब्धीनां विस्तरः |
|---|---|
| ६. श्रुतस्य पठितस्य वा विषयस्य सार-भाव-संरचना-क्रमाणां कथनं पाठस्थचरितानां परिचायनञ्च | ६.१ पठितस्य श्रुतस्य वा विषयवस्तुनः सारांशभावार्थप्रकाशनम्<br>६.२ पठितविषयवस्तुनो विधागतसंरचनाया अभिव्यञ्जनम्<br>६.३ अधीतविषयवस्तूनां यथाक्रमं प्रस्तुतिः<br>६.४ पाठस्थचरितानां वैशिष्ट्यप्रकाशनम् |
| ७. परिचितविषयेषु स्वाभिमतप्रकटनम् | ७.१ श्रुतस्य दृष्टस्य पठितस्य वा विषयवस्तुनः परिचायनम्<br>७.२ अनुभूतविषयस्य विश्लेषणम्<br>७.३ दृष्टसामाजिकसमस्यायाः समाधानोपायप्रदर्शनम् |
| ८. पाठगतानां भाषातत्त्वानां परिचायनम् | ८.१ पाठानुप्रयुक्तसन्धीनां नामाङ्कनम्<br>८.२ निर्दिष्टानां शब्दानां धातूनाञ्च रूपावलिकथनम्<br>८.३ पाठप्रयुक्तानामव्ययपदानां सान्दर्भिकार्थप्रकाशनम्<br>८.४ निर्दिष्टप्रत्ययैर्निष्पन्नानां पाठप्रयुक्तानां पदानां प्रकृतिप्रत्ययनिर्धारणम्<br>८.५ पाठस्थवाक्येषु प्रयुक्तानां पदानां कारकविभक्तिनिर्देशनम्<br>८.६ पाठप्रयुक्तपदानां वाच्य-काल-भावनिदर्शनम्<br>८.७ श्रुतवाक्यानां वाच्य-काल-भावपरिवर्तनम् |
| ९. पाठगतविषयाणां वर्णनम् | ९.१ अन्तर्जालसम्बद्धं प्रबन्धं श्रुत्वा अन्तर्जालदुरुपयोगस्य हानिपक्षोद्घाटनम्<br>९.२ परोपकारसम्बद्धपद्यानां श्रवणेन परोपकारमाहात्म्यनिरूपणम्<br>९.३ प्रतिवेदनलेखनविधेराकर्णनेन प्रतिवेदनलेखनक्रमनिर्धारणम्<br>९.४ संवादं श्रुत्वा प्रकृतिसंरक्षणे वन्यजन्तूनां स्थाननिर्धारणम्<br>९.५ नारीसम्मानपद्यानां श्रवणेन नारीसम्मानस्यावश्यकत्वनिरूपणम्<br>९.६ कथां श्रुत्वा आहारशुद्धेर्माहात्म्यप्रकटनम् |

## पठनम्

| शिक्षणोपलब्धयः | शिक्षणोपलब्धीनां विस्तरः |
|---|---|
| १. लयमनुसृत्य पद्यस्य वाचनम् | १.१ यति-गति-लयनिर्धारणेन पद्यस्य पठनम्<br>१.२ पद्यं पठित्वा यतिनिर्धारणम्<br>१.३ लयबोधपुरःसरं पद्यस्य गायनम्<br>१.४ पठितस्य पद्यस्य भावप्रकाशनम् |
| २. विषयावगमेन निर्धारितगद्यांशस्य पठनम् | २.१ गद्यांशस्य द्रुतपठनम्<br>२.२ गद्यांशस्य मौनपठनं विधाय तद्गतविषयप्रकाशनम्<br>२.३ अधीतस्य गद्यांशस्य सारसन्देशकथनम्<br>२.४ सन्धियुतपदानि परिचित्य तद्विच्छेदनेन निर्धारितगद्यांशस्य पठनम्<br>२.५ लेख्यचिह्नानां पालनेन गद्यांशस्य सस्वरं साभिनयञ्च वाचनम्<br>२.६ पाठ्यांशपठनेन प्रमुखविषयाणां सङ्क्षेपेण प्रस्तुतिः<br>२.७ पाठ्यवस्तुनोऽज्ञातार्थानां पदानां सङ्कलनम् |
| ३. निर्धारितसंवादाध्ययनेन विषयप्रकाशनम् | ३.१ संवादं पठित्वा प्रमुखविषयाणां सूत्ररूपेण निगदनम्<br>३.२ परिवेशं प्रकल्प्य संवादस्य साभिनयं पठनम्<br>३.३ निर्धारितसंवादमधीत्य सन्देशप्रकाशनम् |
| ४. निर्दिष्टविषयवस्त्वाश्रित्य प्रश्नोत्तरणम् | ४.१ पाठस्य विषयमाधृत्य प्रश्ननिर्माणम्<br>४.२ पठितपाठस्थविषयवस्तुनः प्रकटनम्<br>४.३ अधीतविषयवस्तुन उद्धृतप्रश्नानामुत्तरणम्<br>४.४ पाठं पठित्वा सारवाक्यानां भावविस्तरणम् |
| ५. पाठेतरसामग्रीणां पठनेन विषयवस्तूनां प्रकाशनम् | ५.१ पाठेतरा निर्दिष्टसामग्रीरधीत्य तद्गतविषयवर्णनम्<br>५.२ श्रुतस्य दृष्टस्य पठितस्य वा वस्तुनो विषयाभिव्यञ्जनम्<br>५.३ अनुभूतेषु सामयिकविषयेषु स्वाभिमतप्रकटनम् |

| | |
|---|---|
| ६. पाठगतभाषातत्त्वानामनुशीलनम् | ६.१ संस्कृतभाषाया गद्यपद्ययोः सन्धिविच्छेदपुरःसरं पठनम्<br>६.२ निर्धारितानां धातूनां शब्दानाञ्च रूपावल्यास्तत्प्रयोगेण निर्मितवाक्यानाञ्च पठनम्<br>६.३ निर्दिष्टधातूनां रूपावल्याः पठनेन कालनिर्धारणम्<br>६.४ पाठं पठित्वा निर्दिष्टप्रत्ययैर्निष्पन्नानां पदानां सङ्कलनम्<br>६.५ पाठितपाठाद् निर्दिष्टकारकविभक्त्योरुदाहरणानामन्वेषणम्<br>६.६ पाठस्य मौनपठनेन उपसर्गसहितानां समस्तानाञ्च पदानां सूचीकरणम्<br>६.७ पाठितानामव्ययपदानां पाठानुकूलमर्थनिर्धारणम्<br>६.८ पाठगतवाक्यानां पठनेन वाक्यगतवाच्य-काल-भावनिगदनम् |
| ७. पाठस्य पठनेन तद्गतविषयाणामभिव्यञ्जनम् | ७.१ अन्तर्जालविषयकं प्रबन्धं पठित्वा अन्तर्जालस्य सत्पक्षप्रदर्शनम्<br>७.२ परोपकारसम्बद्धपद्यानि पठित्वा परोपकारस्य आर्यसंस्कृतेरङ्गत्वनिरूपणम्<br>७.३ संवादपठनेन वन्यजन्तूनां संरक्षणस्य लाभनिदर्शनम्<br>७.४ नारीसम्मानपद्यानामध्ययनेन समाजे नारीणां स्थाननिर्धारणम्<br>७.५ व्यावहारिकलेखनसम्बद्धं पाठं पठित्वा निमन्त्रणपत्रस्य समाचारस्य च लेखने विचार्याणां विषयाणां सूचीकरणम्<br>७.६ कथां पठित्वा तद्गतचरित्राणां चारित्रिकवैशिष्ट्यप्रदर्शनम् |

## लेखनम्

| शिक्षणोपलब्धयः | शिक्षणोपलब्धीनां विस्तरः |
|---|---|
| १. पद-वाक्यानुच्छेदानां शुद्धलेखनम् | १.१ पदानां वाक्यानाञ्च श्रुतलेखनम्<br>१.२ पद-वाक्यानुच्छेदानामनुलेखनम्<br>१.३ अशुद्धिनिराकरणपुरःसरं पद-वाक्यानुच्छेदानां पुनर्लेखनम्<br>१.४ पठितपदवाक्ययोः शुद्धलेखनम् |
| २. अर्थानुशीलनेन पठितपदानां वाक्येषु योजनम् | २.१ सन्दर्भं विचार्य पठितपदानामर्थापनम्<br>२.२ वाक्यानुच्छेदस्थानां निर्दिष्टपदानां पर्यायपदैः प्रतिष्ठापनम्<br>२.३ पठितानामनेकार्थकपदानां यथासन्दर्भं प्रयोगकौशलप्रदर्शनम्<br>२.४ विपर्ययपदैर्निर्दिष्टपदानि प्रतिष्ठाप्य विलोमार्थे वाक्यस्य परिवर्तनम्<br>२.५ पठितपदानां योजनेन मौलिकवाक्यनिर्माणम् |
| ३. अनुच्छेदस्य पठनेन प्रश्नोत्तरणम् | ३.१ सरलवाक्यै रचितादनुच्छेदाद् बोधप्रश्नानां निर्माणम्<br>३.२ निर्दिष्टानुच्छेदसम्बद्धप्रश्नानामुत्तरणम्<br>३.३ निर्दिष्टानुच्छेदस्य सारलेखनम्<br>३.४ प्रमुखविषयान् सूत्रीकृत्य निर्दिष्टानुच्छेदस्य सङ्क्षेपीकरणम् |
| ४. पठितविषयमाधृत्य प्रश्नोत्तरणम् | ४.१ पठितविषयेषु प्रश्नोपस्थापनम्<br>४.२ प्रश्नार्थकपदैर्वाक्यस्थपदानां प्रतिष्ठापनेन प्रश्नार्थे वाक्यपरिवर्तनम्<br>४.३ प्रश्नप्रकृतिबोधपूर्वकमुत्तरलेखनम्<br>४.४ पाठसम्बद्धानां प्रश्नानामुत्तरदानम् |
| ५. पाठ्यवस्तुनो विषयप्रकाशनम् | ५.१ पठितगद्यगतविषयाणां सार-सन्देशलेखनम्<br>५.२ पठितस्य पद्यस्य गीतस्य च भावार्थलेखनम्<br>५.३ पाठस्थसुभाषितानां भावप्रकाशनम्<br>५.४ पाठगतचरितानां चारित्र्यविश्लेषणम्<br>५.५ सतर्कं पठितविषयाणामुपस्थापनम्<br>५.६ सन्दर्भप्रसङ्गयोर्निदर्शनेन पाठगतविशिष्टवाक्यानां व्याख्यानम् |

| शिक्षणोपलब्धयः | शिक्षणोपलब्धीनां विस्तरः |
|---|---|
| ६. निर्दिष्टविषयमनुसृत्य सर्जनात्मकलेखनम् | ६.१ अनुभूतविषयाणां मौलिकवर्णनम्<br>६.२ सूत्राधारेण कथाया लघुप्रबन्धस्य च लेखनम्<br>६.३ पद्ये निबद्धविषयस्य गद्यमाध्यमेन विस्तरणम्<br>६.४ लघुनाटककथयोः प्रत्यक्षकथनानामप्रत्यक्षकथनशैल्या लेखनम्<br>६.५ प्रदत्तविवरणाधारेण जीवनवृत्तलेखनम्<br>६.६ परिचितविषयमवलम्ब्य अनुच्छेदरचनम्<br>६.७ स्वानुभूतविषयेषु लघुप्रबन्धरचनाभ्यासः<br>६.८ पठितपद्यानां गद्ये रूपान्तरणम्<br>६.९ कस्यचिद् विषयस्य अध्ययनेन प्रवचनस्य कृते सूत्राणां निर्माणम् |
| ७. पाठगतविषयानुशीलनेन मौलिकलेखनम् | ७.१ अन्तर्जालस्य सदुपयोगविधिनिरूपणम्<br>७.२ अन्तर्जालस्य दुरुपयोगस्य दुष्परिणामसूचनम्<br>७.३ परोपकारस्य महत्त्वनिरूपणेन लघुनिबन्धलेखनम्<br>७.४ पठितपद्यानां भावार्थप्रकाशनेन तद्व्यावहारिकत्वनिरूपणम्<br>७.५ प्रदत्तविषयानाधृत्य सविधि प्रतिवेदनलेखनम्<br>७.६ वन्यजन्तूनां प्रकृतिपूरकत्वं संसाध्य प्रबन्धरचना<br>७.७ नारीसम्मानस्य आवश्यकतां समुचितोपायान् चावलम्ब्य अनुच्छेदरचना<br>७.८ प्रयोजननिर्देशनेन निमन्त्रणपत्रस्य रचना<br>७.९ सामयिकं विषयमाधृत्य समाचारलेखनम्<br>७.१० उचितानुचिताहारयोर्लाभहानिनिरूपणेन पत्रलेखनम् |
| ८. सरलवाक्यानामनुवादः | ८.१ पठितसंस्कृतवाक्यानां नेपालिभाषायामनुवादः<br>८.२ नेपालिभाषायाः सरलवाक्यानां संस्कृतेऽनुवादः<br>८.३ प्रदत्तयोः पठितगद्यांशपद्यांशयोर्नेपालिभाषायामनुवादः |

| शिक्षणोपलब्धयः | शिक्षणोपलब्धीनां विस्तरः |
| --- | --- |
| ९. पाठे प्रयुक्तानां भाषातत्त्वानां प्रयोगः | ९.१ पठितसन्धिनियमानुशीलनेन संस्कृतभाषया निबद्धेषु गद्यपद्येषु सन्धिविधानं सन्धिच्छेदनञ्च<br>९.२ निर्धारितानां धातूनां शब्दानाञ्च रूपावल्या वाक्येषु प्रयोगः<br>९.३ निर्दिष्टधातूनां रूपावल्या अनुशीलनेन निर्दिष्टकालस्य वाक्यरचना<br>९.४ निर्दिष्टप्रत्ययैर्निष्पन्नानां पाठगतपदानां प्रकृतिप्रत्यययोर्विच्छेदनम्<br>९.५ पाठाधृतकारकनियमाननुशील्य निर्देशानुसारेण वाक्येषु समुचितविभक्तीनां प्रयोगः<br>९.६ पाठप्रयुक्तानां सोपसर्गपदानामुपसर्गनिदर्शनम्<br>९.७ पाठे प्रयुक्तेषु समस्तपदेष्वन्तर्भूतानां पदानां निश्चयनम्<br>९.८ पठितानामव्ययपदानां प्रयोगेण वाक्यनिर्माणम्<br>९.९ वाक्यानां वाच्य-काल-भावपरिवर्तनेन लेखनम् |

## ४. विषयक्षेत्रं क्रमश्च

### कक्षा ९

| क्र स. | विषयः | क्षेत्रम् | बोधः | अभिव्यक्तिः | व्याकरणम् | कार्य-घण्टाः |
|---|---|---|---|---|---|---|
| १. | गद्यम् | सामाजिकम् | - गद्यस्य पठनबोधः ।<br>- संस्कृतिसम्बद्ध-विषयाणां बोधः । | गद्यांशस्य आदर्शपठनम् ।<br>- गद्यांशस्य निष्कर्षणम् ।<br>- समाजसम्बद्धविषयाणां बोधः ।<br>- सम्बद्धप्रश्ना-नामुत्तरणम् । | वर्णानामुच्चारणस्थान-प्रयत्नादिज्ञानम् ।<br>यण्-गुण-वृद्धि-सवर्णदीर्घ-पूर्वरूपादिसन्धि-नियमानां बोधः प्रयोगश्च । | २० |
| २. | पद्यम् | पौराणिकम् (प्रकृतिवर्णनपरम्) | - निर्दिष्टपद्यानां लयबोधः पठनबोधश्च ।<br>- साहित्यिकानुच्छेदस्य पठनबोधः । | - वृत्तलक्षणमनुसृत्य पद्यानां वाचनम् ।<br>- पद्यानां गद्ये रूपान्तरणम् ।<br>- साहित्यिकानुच्छेदस्य बोध-प्रश्नानामुत्तर-लेखनम् । | श्चुत्व-ष्टुत्व-जश्त्व-पररूप-चर्त्वानुस्वारादिसन्धि-नियमानां बोधः प्रयोगश्च । | १८ |
| ३. | पत्रम् | प्राशासनिकम् | सर्वकारसम्बद्ध-कार्यालयाय अन्यसङ्घटितसंस्थायै चावश्यकपत्र-विषयबोधः ।<br>- प्राशासनिक-पत्रस्य घटकनिर्धारणम् । | - पत्रसंरचना-विमर्शनम् ।<br>- प्राशासनिकपत्र-संरचना-विमर्शनम् ।<br>- निवेदनाङ्ग-विमर्शनम् । | उत्व-विसर्गादेश-सत्व-सुलोपादिविसर्ग-सन्धिनियमानां बोधः प्रयोगश्च । | १३ |
| ४. | संवादः | बालस्वास्थ्य-सम्बद्धः | - संवादस्य पठनबोधः ।<br>- स्वास्थ्यसंरक्षण-सम्बद्ध-गद्यांशबोधः । | - संवादस्य गद्यान्तरणम् ।<br>- साभिनयं संवादपठनम् ।<br>- संवादसन्देशविमर्शः ।<br>- स्वास्थ्यसंरक्षण-सम्बद्ध-वार्तालापः ।<br>- बोधप्रश्नाना-मुत्तरणम् । | लिङ्ग-वचन-पुरुष-कालानामाधारेण वाक्यान्तरणाभ्यासः ।<br>निर्धारित-वाक्यानामनुच्छेदस्य वा संस्कृत-नेपाल्योर्मिथोऽनुवादः । | १८ |

| क्र स. | विषयः | क्षेत्रम् | बोधः | अभिव्यक्तिः | व्याकरणम् | कार्य-घण्टाः |
|---|---|---|---|---|---|---|
| ५. | गद्यम् | नीतिपरम् (मित्रतासम्बद्धम्) | नीतिकथाया गद्यांशबोधः । कथायाः पात्राणां चरित्रविमर्शः । नीतिकथायाः पात्रपरिवेशसन्देशा-दीनां बोधः । | कथायाः पात्रस्य विषये वर्णनम् । नीतिकथायाः सन्देशप्रकाशनम् । नीतिकथायाः प्रश्नानामुत्तरप्रदानम् । | कर्तृ-कर्म-भाववाच्येषु वाक्यान्तरणाभ्यासः । सरलजटिल-वाक्यनिर्माणम् । | १८ |
| ६. | व्यवहारोपयोगि-रचना | सूचनालेखनम् शुभकामनापत्र-लेखनम् वर्धापनपत्र-लेखनम् । | - सूचना-शुभकामनापत्र-वर्धापनपत्राणां विषय-संरचनाग-तपार्थक्यबोधः ।<br>- उक्तपत्राणामवयवानामु-पयोगितायाश्च बोधः । | सूचना-शुभकामनापत्र-वर्धापनपत्राणां विषयविश्लेषणम् । उक्तपत्राणां पृथक्-पृथक्तत्त्वानां समुचितसंयोजनञ्च । | निर्दिष्टाव्यय-शब्दानामर्थज्ञानं तेषां वाक्येषु प्रयोगश्च । | १७ |
| ७. | पद्यम् | चित्तस्थैर्यसम्बद्धानि नीतिपद्यानि | निर्दिष्टपद्यानां लयबोधः । निर्धारितपद्यानां विषयवस्तुबोधः । उक्तपद्यानां जीवनोपयोगित्वसम्पादनम् । | निर्दिष्टपद्यानां सन्देशकथनम् । चित्तस्थैर्याय उक्तपद्यानां प्रभावकथनम् । निर्दिष्टपद्यान्याश्रित्य पृष्टानां प्रश्नानामुत्तरप्रदानम् । | ण्यन्त-सन्नन्त-यङन्तक्रियापदानां प्रयोगाभ्यासः ।<br>स्त्रीप्रत्ययान्त-शब्दानां वाक्येषु प्रयोगः । | १६ |
| | | | | | सैद्धान्तिकाभ्यासः | १२० |
| | | | | | प्रयोगात्मकाभ्यासः | ४० |
| | | | | | योगः | १६० |

# कक्षा १०

| क्र. स. | विषयः | क्षेत्रम् | बोधः | अभिव्यक्तिः | व्याकरणम् | कार्य-घण्टाः |
|---|---|---|---|---|---|---|
| १. | गद्यम् | विज्ञानसम्बद्धम् (अन्तर्जाल-सम्बद्धम्) | निर्दिष्टगद्यांशस्य विषयवस्तुबोधः । पारिभाषिक-शब्दार्थबोधः । | निर्दिष्टगद्यांशस्य प्रवाहपूर्ण-पठनम् । निर्दिष्ट-विषयसम्बद्धबोध-प्रश्नानामुत्तरणम् । | वर्णपरिचयः, वर्णविभागः, सन्धिप्रयोगश्चेति विषयाणां पुनरावृत्तिः । अच्-अन्-इन्नन्तानां पुंल्लिङ्गशब्दानाम्, आबन्तानां ङ्यन्तानां स्त्रीलिङ्गशब्दानां च रूपावलिबोधः, तेषां वाक्येषु प्रयोगश्च । | २० |
| २. | पद्यम् | परोपकार-सम्बद्धम् | पद्यानां लयबोधः पठनबोधश्च । पद्यगतभावबोधः । | निर्दिष्टपद्यानां सन्देशकथनम् । परोपकारस्य महत्त्वविमर्शः । निर्दिष्टपद्यान्याश्रित्योद्-भावितानां प्रश्नानामुत्तरप्रदानम् । | अच्-अन्-इन्नन्तानां नपुंसकलिङ्गशब्दानां रूपावल्या बोधः, वाक्येषु प्रयोगश्च । भूतकालिक-वाक्यानामभ्यासः प्रयोगश्च । | १८ |
| ३. | व्यावहारिक-लेखनम् | प्रतिवेदन-लेखनम् | प्रतिवेदनस्य संरचनाबोधः । निर्दिष्टप्रतिवेदनस्य विषयवस्तु-बोधः । प्रतिवेदनोपयोगि-तत्त्वानां बोधः । | प्रतिवेदन-लेखनस्यावश्यकताया विषये विमर्शः । प्रतिवेदनाङ्गानां मिथः समायोजनम् । प्रतिवेदन-लेखनाभ्यासः । | चिकित्सा-शिक्षा-कृषि-पर्यावरण-दर्शन-योगादिविविधक्षेत्रेषु प्रचलितानां पारिभाषिकशब्दानां बोधः, वाक्येषु प्रयोगश्च । वर्तमान-भविष्यत्कालिक-क्रियापदानां वाक्येषु प्रयोगाभ्यासः । | १३ |
| ४. | संवादः | वन्यजन्तु-संरक्षण-सम्बद्धः | संवादस्य पठनबोधः । संवादस्य विधागतस्वरूपबोधः । वन्यजन्तुसंरक्षणस्य महत्त्वबोधः । | संवादस्य साभिनयपठनम् । संवादगतविषय-वस्तुविमर्शः । वन्यजन्तूनां संरक्षणादसंरक्षणाद् वा जायमानलाभहानि-विमर्शः । | तव्यत्-अनीयर्-यत्-तृच्-ण्वुल्-क्त-क्तवतु-क्तिन्-प्रत्ययान्तानां शब्दानां बोधः, वाक्येषु प्रयोगश्च । कर्तृ-कर्म-करणकारकाणां बोधो वाक्यरचना च । | १८ |

| क्र. स. | विषयः | क्षेत्रम् | बोधः | अभिव्यक्तिः | व्याकरणम् | कार्य-घण्टाः |
|---|---|---|---|---|---|---|
| ५ | पद्यम् | नारीसम्मान-सम्बद्धम् | निर्दिष्टपद्यानां लयबोधः । निर्धारितपद्यानां विषयवस्तुबोधः । उक्तपद्यानां जीवनोपयोगित्वोपपादनम् । | निर्दिष्टपद्यानां सन्देशकथनम् । नारीसम्मानाय उक्तपद्यानां प्रभावकथनम् । निर्दिष्टपद्यान्याश्रित्य पृष्टानां प्रश्नानामुत्तरप्रदानम् । | टाप्-चाप्-डाप्-ङीप्-ङीष्-ङीन्-ऊङ्-ति-प्रत्ययान्तानां स्त्रीत्वबोधकशब्दानां वाक्येषु प्रयोगाभ्यासः । सम्प्रदानापादानाधिकरण-कारकाणां बोधः प्रयोगश्च । | १८ |
| ६. | व्यावहारिक-लेखनम् | निमन्त्रणा-पत्रस्य समाचारस्य च लेखनम् | निमन्त्रणापत्रस्य संरचनागततत्त्वानां तत्क्रमस्य च बोधः । समाचारतवानां बोधः । समाचारलेखने विषयवस्तूनां क्रमबद्धविन्यासस्य महत्त्वबोधः । | निमन्त्रणापत्र-समाचारगत-विषयवस्तुबोधः । निमन्त्रणापत्र-लेखनाभ्यासः । समाचार-लेखनाभ्यासः । | लिङ्ग-वचन-पुरुष-काल-वाच्यानामाधारेण वाक्यान्तरणाभ्यासः । निर्दिष्टवाक्याना-मनुच्छेदस्य वा संस्कृत-नेपाल्योर्मिथोऽनुवादः । | १७ |
| ७. | गद्यम् (प्रबन्धः) | आहारशुद्धि-विषयकम् | प्रबन्धगत-विषयवस्तुबोधः । आहारशुद्धेर्महत्त्व-बोधः । | आहारशुद्धेर्महत्त्व-प्रकटनम् । उचितानुचिता-हारयोर्लाभहा-निविमर्शः । आहारस्य, स्वास्थ्यस्य विचारस्य च परस्परं सम्बन्धविमर्शः । | तत्पुरुष-कर्मधारय-द्विगु-द्वन्द्व-बहुव्रीहिसमासानां बोधः, विगृहीतपदानां समासः, समस्तपदानां विग्रहः, समस्तपदानां वाक्येषु प्रयोगश्च । | १६ |
| | | | | | सैद्धान्तिकाभ्यासः | १२० |
| | | | | | प्रयोगात्मकाभ्यासः | ४० |
| | | | | | योगः | १६० |

## ५. प्रयोगात्मककार्यं परियोजनाकार्यञ्च

| क्र.सं. | क्षेत्रम् | परीक्षणीयाः पक्षाः | अङ्क-भारः | मूल्याङ्कनाधाराः |
|---|---|---|---|---|
| १. | शिक्षण-सहभागिता | (क) उपस्थितिः<br>(ख) सहभागिता | ३ | ➢ विद्यार्थिनां दैनिकोपस्थितेरभिलेखः<br>➢ भाषिकशिल्पविकासाय वैयक्तिक-युगल-समूहगतादि-कक्षागतशिक्षणसहभागिता |
| २. | परियोजनाकार्यम् | प्रयोगात्मककार्यं परियोजना-कार्यञ्च | ६ | ➢ श्रवण-भाषण-पठन-लेखनशिल्पविकास-सम्बद्धा लिखिता मौखिकी च प्रस्तुतिः<br>➢ भाषिकशिल्पविकाससम्बद्धपरियोजनाकार्यस्य प्रतिवेदनमन्तर्वार्ता, तस्याभिलेखश्च |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | (क) श्रवणम् | ५ | ➢ रेडियो-मोबाइल-नामधेयानामन्येषां वा वैद्युतोपकरणानां माध्यमेन संवादः, समाचारादिश्रवणेन तत्सारादिनिरूपणम्<br>➢ श्रुतिलेखनम्<br>➢ सन्देशमूलकगद्यांशं श्रावयित्वा अनुमान-पूर्वानुमान-प्रश्नोत्तर-शब्दबोधार्थबोध-भावबोध-सन्दर्भबोध-कथाकथन-घटनावर्णन-सूत्रीकरणसम्बद्धान् प्रश्नान् पृष्ट्वा उत्तरकथनं लेखनञ्च<br>अथवा<br>➢ १००-१३० शब्दात्मकमदृष्टांशं गद्यांशं पद्यांशं वा श्रावयित्वा अनुमान-पूर्वानुमान-प्रश्नोत्तर-शब्दबोधार्थबोध-भावबोध-सन्दर्भबोध-कथाकथन-घटनावर्णन-सूत्रीकरणसम्बद्धान् प्रश्नान् पृष्ट्वा उत्तरकथनं लेखनञ्च |
| | | (ख) भाषणम् | ५ | **(अ) मौखिकवर्णनं कथाकथनं वा (४ अङ्काः)**<br>किञ्चिद् विषयवस्तु, चित्रं परिवेशादिकं च निर्दिश्य मौखिकवर्णनम् । तत्र क्रमे वक्त्रा स्वाभिव्यक्तौ स्पष्टता-शैली-भाषिकस्तर-शुद्धोच्चारण-गति-यति-लयाभिनयप्रभृतिपक्षेषु ध्यानं दत्तं न वेति विषयो विचारणीयः ।<br>अथवा<br>कथां श्रुत्वा कथाकथने घटनापात्रपरिवेशादिवर्णने प्रवर्तनम्<br>**(आ) सस्वरवाचनम् (३ अङ्काः)**<br>पत्रपत्रिकाभ्योऽन्यलिखितसामग्रीभ्यो वा शब्दात्मकं गद्यांशं पद्यांशं वा निर्दिश्य गति-यति-लयानुकूल्येन भावानुकूल्येन च सस्वरवाचने प्रवर्तनम् । वाचनक्रमे वक्त्रा स्वाभिव्यक्तौ स्पष्टता-शैली-भाषिकस्तर-शुद्धोच्चारण-गति-यति-लयाभिनयप्रभृतिपक्षेषु विशेषतोऽवदानं देयम् |
| ४. | त्रैमासिकपरीक्षा | मौखिकं लिखितं वा | ६ | त्रैमासिकपरीक्षाणां प्राप्ताङ्कस्यानुपातिकप्रतिशताधारेणाङ्क-निर्धारणं कर्तव्यम् |
| योगः | | | २५ | |

## ६. शिक्षणसहजीकरणप्रक्रिया

संस्कृतभाषायाः संस्कृतव्याकरणस्य चाध्ययनस्य माध्यमेन संस्कृतगद्यपद्यव्याकरणादीनां विविधविषयाणां ज्ञानेन सह सच्चरित्रवतां नीतिमतां च नागरिकाणां निर्माणमस्य विषयस्योद्देश्यं वर्तते । एतस्मिन् पाठ्यक्रमे समाविष्टानां गद्यपद्ये तिहासपुराणकाव्यव्याकरणादिविषयाणां समानं महत्त्वं पुरस्कृत्य सर्वेषां क्षेत्राणां विचारेण सर्वेऽपि विषयाः पाठयितव्याः । निर्धारितविषयवस्तूनां सहजीकरणेन छात्रेभ्य आवश्यकानां ज्ञानशिल्पादीनां विकासनं च नितरामावश्यकं वर्तते । न केवलं सैद्धान्तिकज्ञानस्य अपि तु व्यावहारिकपक्षस्य च विकासाय तदनुकूलविचाराणां निर्माणाय, व्यवहाराय च विद्यार्थिन उत्प्रेरणीया भवन्ति ।

भाषाशिक्षणस्योपक्रमे भाषिकशिल्पस्य विकासाय विशेषतो विद्यार्थिकेन्द्रिताः कार्यकलापा अवलम्बनीया भवन्ति । छात्राणां सामाजिकीं पृष्ठभूमिं स्तरगतयोग्यताञ्च विचार्य तदनुकूलाध्यापनमावश्यकं भवति । शिक्षणसहजीकरणाय वैयक्तिकः सामूहिकश्च प्रयत्नो विधेयः । अधो निर्दिष्टाः शिक्षणसहजीकरणकार्यकलापा अस्य पाठ्यक्रमस्य उद्देश्यसिद्धये उपयोगिनो भवन्ति-

१. **विषयाणां (विधानां) माध्यमेन शिल्पानां शिक्षणम्** - गद्यपद्यव्यावहारिकलेखनरूपाणां शिल्पविकासस्य साधनानामवलम्बनम् ।

२. **शिल्पाश्रितं शिक्षणम्** - भाषिकशिल्पस्य विकासाय भाषायाः श्रवण-भाषण-पठन-लेखनरूपाणां चतुर्णामेव शिल्पानामेकीकृतशिक्षणम् ।

३. **अभ्यासप्रधानाः सर्जनात्मकाश्च क्रियाकलापाः** - भाषिकशिल्पचतुष्टयस्य विकासाय अधो लिखितानामभ्यासप्रधानानां सर्जनात्मकानाञ्च क्रियाकलापानां सम्पादनमावश्यकं भवति-

   (क) प्रस्तुतीकरणम्　　(ख) अभ्यासः　　(ग) उत्पादनम्

   (घ) पठनबोधः　　(ङ) प्रयोगात्मककार्यम्　　(च) पृष्ठपोषणम्

   (छ) आत्ममूल्याङ्कनम्

४. **बहुविधक्षमतायाः स्तराणाञ्चानुसारेण शिक्षणम्**

५. **सदसद्विवेकविकासः**

६. **सहकार्यप्रधानशिक्षणम्**

७. **सामूहिकमूल्याङ्कनापेक्षि शिक्षणम्**

### शिक्षणप्रक्रियायाः सम्भाव्याः शिल्पगतसंयुक्तक्रियाकलापाः

**(क) श्रवणशिक्षणस्य सम्भाव्याः क्रियाकलापाः**

- पद्यांशस्य गद्यांशस्य वोच्चारणं विधाय अनुवाचनाय निर्देशनम्

- शुद्धाशुद्धोच्चारणं संश्राव्य शुद्धाशुद्धानां शब्दानां वाक्यानां वा विवेकाय निर्देशनम्
- संवादप्रश्नोत्तरविमर्शनानि श्रावयित्वा प्रतिक्रियाभिव्यक्त्यै प्रेरणम्
- गद्यपद्ययोः प्रेरकमंशं श्रावयित्वा तस्य पुनरावृत्त्यै उत्प्रेरणम्
- प्रसिद्धां घटनां संश्राव्य तस्याः प्रमुखसूत्राणां कथनाय निर्देशनम्
- सञ्चारमाध्यमानां कार्यक्रमान् श्रावयित्वा तेषां विषये प्रश्नोत्तरविमर्शने सञ्चालयितुं प्रेरणम्

**(ख) सम्भाषणशिक्षणस्य सम्भाव्याः क्रियाकलापाः**

- सामूहिकरूपेण वर्णानां पदानाञ्च शुद्धोच्चारणाय निर्देशः
- निर्धारितानां पद्यानां गतियतिलयमाधुर्यादिकमनुसृत्य प्रवाचनाय प्रेरणम्
- दृष्टानां श्रुतानामनुभूतानाञ्च विषयाणां चरित्रघटनापरिणामानां वर्णनाय निर्देशः
- रूपकस्य संवादानां साभिनयं पठनाय निर्देशः
- सुभाषितस्य भावार्थं निगदितुं निर्देशः
- व्यावहारिकलेखनस्यावश्यकतां वर्णयितुमुत्प्रेरणम्
- नेपालीभाषायामुच्चारितानि वाक्यानि संस्कृतभाषायामनूद्य उच्चारयितुं निर्देशः

**(ग) पठनशिक्षणस्य सम्भाव्याः क्रियाकलापाः**

- समस्तपदानि प्रयुज्य वाक्यनिर्माणपूर्वकं पठनाय अभिप्रेरणम्
- गद्यपद्ययोर्विशिष्टार्थबोधकमंशं सञ्चित्य पठितुं निर्देशः
- पाठस्यानुच्छेदं पठित्वा तस्य मूलसूत्राणि निर्माय च पठनार्थमुत्प्रेरणम्
- व्यावहारिकलेखनसम्बद्धपाठानां प्रकारनिर्देशनपूर्वकं पठनाय प्रेरणम्
- पद्यानि पठित्वा तान्यनुपठितुमभिप्रेरणम्
- अनुच्छेदस्य मन्दगत्या द्रुतगत्या च पठनाय उत्प्रेरणम्

**(घ) लेखनशिक्षणस्य सम्भाव्याः क्रियाकलापाः**

- वर्णविन्यासस्य समुचितक्रममवलम्ब्य शुद्धतया लेखनाय प्रोत्साहनम्
- पाठ्यवस्तूनामुत्तरलेखनाय उत्प्रेरणम्

- पदवाक्यानुच्छेदानां श्रुतिलेखनाय निर्देशः
- लेख्यचिह्नरहितमनुच्छेदं दत्त्वा समुपयुक्तस्थलेषु समुचितचिह्नानां प्रयोगाय प्रेरणम्
- पाठ्यवस्तुघटकान् घटनाचरित्रपरिवेशान् वर्णयित्वा लेखनाय अभिप्रेरणम्
- मूलसूत्राणि निर्दिश्य व्यावहारिकलेखनाय उत्प्रेरणम्
- यथेच्छं लिखितरचनां निर्मातुं प्रोत्साहः
- अन्यैर्लिखितानां विषयाणां (सामग्रीणां) सम्पादनाय प्रेरणम्
- अशुद्धमनुच्छेदं प्रदाय तस्य शुद्धतया पुनर्लेखनाय अभिप्रेरणम्

## ७. विद्यार्थिमूल्याङ्कनप्रक्रिया

विद्यार्थिनां शिक्षणोपलब्धेर्निश्चयं विधातुं निर्माणात्मकं निर्णयात्मकञ्चेति द्विविधं मूल्याङ्कनं विधातव्यं भवति । विद्यार्थिनां शिक्षणोपलब्धेः परिष्काराय कक्षायामेव कक्षाकार्य-प्रयोगात्मककार्य-परियोजनाकार्यादीनि कारयित्वा सैद्धान्तिकज्ञानस्य शिल्पस्य च विकासो विधेयः । शिक्षणोपलब्धीनां प्रभावोत्पादनाय, क्रियान्वयनाय, विद्यार्थिनां शिल्पगतक्षमताया उन्नयनाय च शिक्षणसहजीकरणकार्यकलापस्य अभिन्नाङ्गतया निर्माणात्मकमूल्याङ्कनस्य विविधपद्धतीनामुपयोगः करणीयः । एतादृशनिर्माणात्मकमूल्याङ्कनस्य शिक्षणोपलब्धेर्निश्चितभारो निर्णयात्मकमूल्याङ्कनस्याप्यवयवरूपो भवति ।

पाठ्यक्रमेणापेक्षिताः स्तरगतयोग्यताः शिक्षणोपलब्धीश्च विद्यार्थिनोऽधिगतवन्तो न वेति विषयस्यान्वेषणाय मूल्याङ्कनस्य महत्त्वं भवति । अतो विद्यार्थिनां शिक्षणोपलब्धीः समाविश्य स्तरगतयोग्यतानुकूलतया मूल्याङ्कनं विधातव्यम् । एतस्य विषयस्य मूल्याङ्कनाय आन्तरमूल्याङ्कनं बाह्यमूल्याङ्कनं चापेक्ष्येते । विद्यार्थिनां कक्षागतप्रस्तुतीनामाधारेण प्रतिशतं पञ्चविंशतिरङ्का आन्तरमूल्याङ्कनद्वारा प्रदीयन्ते चेत्, बाह्यमूल्याङ्कनाय प्रतिशतं पञ्चसप्तत्यङ्कात्मिका लिखितपरीक्षा सञ्चाल्यते । निर्माणात्मकं निर्णयात्मकञ्च मूल्याङ्कनं द्विविधया पद्धत्या भवति । अस्य विषयस्य पाठ्यक्रमे समाविष्टानां स्तरगतयोग्यतानाम्, कक्षागतशिक्षणोपलब्धीनाम्, तासां विषयवस्तूनाम्, तैस्सह सम्बद्धस्य शिल्पस्य, शिक्षणसहभागितायाः, शिक्षणसक्रियतायाश्चाधारेण विद्यार्थिनां शिक्षणस्य मूल्याङ्कनं विधातव्यम् ।

अस्य स्तरस्य विद्यार्थिनां मूल्याङ्कनमक्षराङ्कनपद्धत्या विधीयते । मूल्याङ्कने निर्माणात्मिका निर्णयात्मिका चेति द्वे प्रक्रियेऽवलम्ब्येते । छात्राणां स्तरगतसामर्थ्योपलब्धये विधातव्यैरध्ययनभ्रमण-घटनावलोकन-सर्जनकार्य-वैयक्तिकसामूहिकविमर्शन-लिखितपरीक्षा-प्रत्युत्पन्नमतित्वप्रदर्शन-प्रश्नोत्तरण-कक्षाकार्यपरीक्षण-भाषिकव्यवहारप्रभृतिकार्यै- निर्माणात्मकं मूल्याङ्कनं विधीयते । तेनाविच्छिन्नं मूल्याङ्कनं सम्पद्यते । स्तरगतसामर्थ्योपलब्धये कक्षागतसामर्थ्योपलब्धये च शैक्षिकसत्रस्यान्तेऽन्तिमपरीक्षाया माध्यमेन निर्णयात्मकमूल्याङ्कनं सम्पाद्यते । विद्यार्थिषु पाठ्यवस्तुबोधादर्शचरित्रनिर्माण-मानवीयमूल्यमान्यतावलम्बन-पर्यावरणसंरक्षण-भाषिकशिल्पार्जनप्रभृतिविषयाणां विकासो मूल्याङ्कनस्य मूलाधारो मन्यते ।

मूल्याङ्कनप्रक्रियाया विश्वसनीयतायै वैधतायै एकरूपतायै च स्थानीय-प्रादेशिक-राष्ट्रियस्तरेषु सर्वेषु विषयेषु आन्तरं बाह्यं च मूल्याङ्कनं प्रसिद्धं वर्तते । तदनुकूलतया प्रतिशतं पञ्चविंशत्यङ्कभार आन्तरमूल्याङ्कनस्य भवति चेत्, पञ्चसप्तत्यङ्कात्मिकया परीक्षया बाह्यं मूल्याङ्कनं भवति । आन्तरमूल्याङ्कनं सम्बद्धविषयशिक्षकद्वारा विधेयम् । शिक्षणप्रक्रियया सहैव विषयवस्तुसम्बद्धं मूल्याङ्कनं नैरन्तर्येण कार्यम् । शिक्षणोपलब्धीनां मूल्याङ्कनाय

औपचारिकी अनौपचारिकी च पद्धतिरवलम्बनीया । सहजीकरणक्रमे विद्यार्थिभिरधिगतानां ज्ञानशिल्पप्रयोगोच्चदक्षता-सम्बद्धपक्षाणां मूल्याङ्कनञ्चानिवार्यतया विधेयम् ।

**(क) आन्तरं मूल्याङ्कनम्**

शिक्षणसहजीकरणप्रक्रियायां कक्षाशिक्षणेन सहैव छात्राणामान्तरं निर्माणात्मकं वा मूल्याङ्कनमपि कर्तव्यम् । संस्कृतरचनाविषयशिक्षणक्रमे छात्राणां निर्माणात्मकमूल्याङ्कनाय अधोऽङ्किता विधयोऽवलम्बितुं शक्यन्ते-

- लिखितप्रश्नोत्तरविधिः
- मौखिकप्रश्नोत्तरविधिः
- विद्यार्थिनां परस्परविचारविमर्शविधिः
- विद्यार्थिव्यवहाराध्ययनविधिः

अधो लिखिताधारेणान्तरमूल्याङ्कनं कर्तव्यम्-

| **क.सं.** | **क्षेत्रम्** | **अङ्कभारः** |
|---|---|---|
| १. | शिक्षणसहभागिता | ३ |
| २. | प्रयोगात्मककार्यं परियोजनाकार्यं विषयवस्तुगतं मूल्याङ्कनं वा | १६ |
| ३. | त्रैमासिकपरीक्षा | ६ |
| योगः | | २५ |

**(ख) बाह्यमूल्याङ्कनम्**

निर्णयात्मके बाह्ये वा मूल्याङ्कने पाठ्यक्रमे निर्धारितोद्देश्यानुरूपं विद्यार्थिभिर्निर्दिष्टविषयेषु ज्ञानशिल्पदक्षता अधिगता न वेति सम्परीक्ष्य तदनुसारेण छात्राणां स्तरनिर्धारणं विधीयते । एतादृशं मूल्याङ्कनमावधिकं भवति । शैक्षिकसत्रस्यान्त एतद् मूल्याङ्कनं विधीयते ।

नेपाल सरकार
शिक्षा, विज्ञान तथा प्रविधि मन्त्रालय
पाठ्यक्रम विकास केन्द्र
सानोठिमी, भक्तपुर